


सर्वोत्तमस्तोत्र २०१३

दि. २८/०४/२०१३




दि. २९/०४/२०१३




Crown (कृष्ण)
Grid (भगवान्)
Pavillion (परमात्मा)
Culate (ब्रह्म)

ब्रह्म = नाम रूप कर्म

परमात्मा = विषयरति मुक्तिरति भगवद्रति

भगवान् = ऐश्वर्यादिअनुभावक भजनद्वारा

कृष्ण

↓

आचार्यसानिध्य

↓

वपु और वाणी सूं

↓

चरित्र और उपदेशके अवगाहनसूं

↓

आचार्यमें श्रद्धासूं

↓


सत्संग

↓

बीजभाव

सर्वोत्तमस्तोत्र २०१३

दि. ३०/०४/२०१३



दि. ०१/०५/२०१३

आविर्भावतिरोभावैः मोहनं बहुरूपतः

१) (सत् = चित् = आनंद) = सच्चिदानंदैकरस

२) (सत् ≠ चित् ≠ आनंद) = धर्मविभाजन

३) सत् = (रूप ≠ क्रिया) = कार्यकारणभाव

चित् = (चेतना ≠ नाम) = अंशांशिभाव

आनंद = (रति ≠ अन्तर्यामी) = तिरोभावाविर्भावनियामक

∴ सृष्टिलीला =/≠ ब्रह्म

∴ अंशीआत्मरति = अंशआत्मसंमोह आदि

श्रवण कीर्तन स्मरण → ज्ञानशक्ति

पादसेवन अर्चन वंदन → क्रियाशक्ति

दास्य → अहंता, सख्य → ममता; अहंता ममता → शुक्लवृत्ति

आत्मनिवेदन

## ।। वृन्दापर्णदलार्पणाष्टकम् ।।

शास्त्रोक्तक्रियया बोधक्षमा बुद्धिर्विजायते ।

बोधक्षमायां तस्यान्तु बोध्यरूपावधारणा ।।१।।

बुद्धौ त्वाहितरूपस्य स्थैर्येहि रति सम्भव: ।

उद्भूतरतिदार्ढ्ये हि प्रियान्वेषणकामना ।।२।।

सर्वरूपे प्रिये प्रेम्णा स्वेष्टाकारे हि तत्त्वता ।

सोऽयं क्रम: प्रमाणेन व्युत्क्रमोऽपि प्रमेयत: ।।३।।

शास्त्रोक्ता नवधा या च स्वग्रन्थे तनुवित्तजा ।

ज्ञेयाधिभौतिकी भक्ति: भगवन्मूर्तौ हि देहिनाम्।।४।।

तन्माहात्म्यरुचिश्रद्धाविश्वासानुभवात्मिका ।

भक्तिराध्यात्मिकी प्रोक्ता शुद्धान्त:करणोद्भवा।।५।।

सर्वोपाधिविनिर्मुक्ता श्रीकृष्णकृपया क्वचित् ।

परमानन्दरूपे हि स्वात्मनि साधिदैविकी ।।६।।

त्रिधाप्यन्योन्यतादात्म्यभावापन्ना यदा भवेत् ।


पूर्णा भक्तिरिति प्रोक्ता परब्रह्मस्वरूपिणी ।।७।।

इत्थं ब्रह्मात्मिका भक्ति: तत्तादात्म्यावगाहिनी।

नहि साधनारूपा सा ब्रह्मलीला फलात्मिका।।८।।

श्रीमदाचार्यकृपया पुष्टिभक्तिनिरूपणम्।

अष्टकं मत्प्रभोरंघ्रौ वृन्दापर्णमिवार्पितम् ।।९।।




हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातस्य पतिरेक
आसीद् यद् ..

सदाधार पृथ्वी

(ऋ.१०।१०।१२१)

ब्रह्म = mega कृष्ण

कृष्ण = mini ब्रह्म

सर्वात्मभाव = (अयं=एतद्) = (मम=अहं)
= (लोभ=मोह/मद)

= (भय=मात्सर्य)

सर्वअनात्मभाव = (भय ≠ मात्सर्य)
= (लोभ ≠ मोह)
= (काम ≠ क्रोध)
= (मम ≠ अहं)
= (अयं ≠ एतद्)

## श्लोकोद्धरण

सएव परमकाष्ठापन्नः कदाचिद् जगदुद्धारार्थं अखण्डः पूर्णएव प्रादुर्भूतः 'कृष्ण' इति उच्यते।

(शास्त्रार्थप्रकरण.प्र.१)

मल्लानाम् अशनिर् नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्

गोपानां स्वजनो असतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः

मृत्युर् भोजपतेः विराड् अविदुषां तत्त्वं परं योगिनाम्

वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः।। (भाग. १०।४०।१७)

ततो भगवान् ब्रह्मा-विष्णू रुद्रश्च भूत्वा पुनः कृष्णएव जातः (सुबो.१०।२९।२).

।। श्रीगोप्यः ऊचुः ।।

मैवं विभोर् अर्हति भवान् गदितुं नृशंसं सन्त्यज्य्सर्वविषयान् तव पादमूलं

प्राप्ता भजस्व दुरवग्रहः मा त्यज अस्मान् देवो यथा आदिपुरुषो भजते मुमुक्षून्।।३१।।

यत् पत्यपत्यसुहृदां अनुवृतिर् अंग! स्त्रीणां स्वधर्मइति धर्मविदां त्वयोक्तम्

अस्तु एवं एतदुपदेशपदे त्वयि ईशे प्रेष्ठो भवान् तनुभृतां किल बन्धुर् आत्मा।। (भाग. १०।२६।३१)

तमेव परमात्मानं जारबुद्ध्यापि संगताः जहुर् गुणमयं देहं सद्यः प्रक्षीणबन्धनाः (भाग. १०।२६।११)

नृणां निःश्रेयसार्थाय व्यक्तिर् भगवतो नृप! अव्ययस्य अप्रमेयस्य निर्गुणस्य गुणात्मनः (भाग. १०।२६।१४)

कामं क्रोधं भयं स्नेहं ऐक्यं सौहृदमेव वा नित्यं हरौ विदधते यान्ति तन्मयतां हि ते (भाग. १०।२६।१५)

मन्ये असुरान् भागवतान् त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान् (भाग. ३।२।२४)

गुणदोषदृशिर् दोषो गुणस्तु उभयवर्जितः (भाग. ११।१९।४५)

यः स्वात्मनि इदं निजमाययार्पितं क्वचिद् विभातं क्व च तत् तिरोहितं

अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलो अवतु मां परात्मपरः।।४।।

...

स्वांशेन सर्वतनुभृन् मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते।।१७।।

आत्मात्मजाप्तगृहवित्तजनेषु सक्तैः दुष्प्रापणाय गुणसंगविवर्जिताय

मुक्तातभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय।।१८।।

...

सोऽहं विश्वसृजं विश्वम् अविश्वम् विश्ववेदसम्

विश्वात्मानम् अजं ब्रह्म प्रणतोऽस्मि परं पदम्।। (भाग. ८।३।४-२६)

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुना आत्मनः अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा।।

(भाग. २।९।३५)

शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै

विश्वोद्भवस्थितिलयेषु निमित्तलीलारासय ते नमः इदं चकृम ईश्वराय।। (भाग. ३।९।१४)

शास्त्रे स्कन्धे प्रकरणे अध्याये वाक्ये पदे अक्षरे एकार्थं सप्तधा जानन् अविरोधेन मुच्यते ।।

(भागवतार्थप्रकरण.२)

आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः प्रतीयेरन् परिच्छिेदो व्यापकत्वं च तरय तत् ।।

(शास्त्रार्थप्रकरण. ५४)

अण्वपि ब्रह्म व्यापकं भवति। यथा कृष्णो यशोदाक्रोडेस्थितोऽपि सर्वजगदाधारो भवति ।

(शास्त्रार्थप्रकरण. ५४)

।। श्रीगोप्य उचुः ।।

भजतो अनुभजन्ति एक एक एतद्विपर्ययम् । न उभयांश्च भजन्ति अन्ये एतद् नो ब्रूहि साधु भो ।।१६।।

।। श्रीभगवान् उवाच ।।

मिथो भजन्ति ये सख्य: स्वार्थैकान्तोधमा हि ते । न तत्र सौहृदं धर्म: स्वाथार्थं तद् हि नान्यथा ।।१७।।

भजन्ति अभजतो ये वै करुणा: पितरौ यथा । धर्मौ निरपवादोऽत्र सौहृदं च सुमध्यमा: ।।१८।।

भजतोऽपि न वै केचिद् भजन्ति अभजत: कुत:। आत्मारामा हि आप्ताकामा अकृतज्ञा गुरुद्रुह: ।।१९।।

नाहं तु सख्यो भजतोऽपि जन्तून् भजामि अमीषाम् अनुवृत्तिवृत्तये ।

यथा अधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद ।। (भाग. १०।२९।१६-२०)

रेमे रमेशो व्रजसुन्दरीभि: यथा अर्भक: स्वप्रतिबिम्बविभ्रम:।। (भाग. १०।३०।१७)

कृत्वा तावन्तम् आत्मानं यावतीर् गोपयोषित:। रेमे स भगवान् ताभिर् आत्मारामोऽपि लीलया

(भाग. १०।३०।२०)

गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम्। योऽन्तश्चरति सोऽध्यक्ष: क्रीडनेन इह देहभाक्

(भाग. १०।३०।३६)